# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा एप्रिल – २०१६

| | | |
|---|---|---|
| कक्षा – शास्त्री-१ (SEM-2) | **प्रश्नपत्रम् – ५** | गुणाः - ७० |
| विषयः – साहित्यशास्त्रम् | **CC-1.2.3** | समयः - ११ तः २ |
| दिनाङ्कः – २२/४/२०१५ | सन्दर्भग्रन्थः – साहित्यदर्पणः (तृतीयपरिच्छेदः) | |

| | | |
|---|---|---|
| | **प्रथमान्वितिः -१** | |
| **प्रश्नः -१** | **द्वयोः व्याख्याः करणीया ।** | ०८ |
| | (१) विभावेनानुभावेन व्यक्तः सञ्चारिणा तथा ।<br>रसतामेति रत्यादिः स्थायीभावः सचेतसाम् ॥<br>(२) मायापरः प्रचण्डश्चपलोऽहङ्कारदर्पभूयिष्ठः ।<br>आत्मश्लाघानिरतो धीरैर्धीरोदात्तः कथितः ।<br>(३) धीरा कलाप्रगल्भा स्याद्वेश्या सामान्यनायिका ॥ | |
| **प्रश्नः -२** | करूणादीनां रसानां दुःखमयत्वात् कथं रसत्वम्? इति लिख्यतां विस्तरेण ।<br>अथवा<br>रसास्वादनप्रकारः विस्तरेण गन्थोक्तदिशा विवेचनीयः । | ०८ |
| **प्रश्नः -३** | **टिप्पणीद्वयं लिखत ।** | ०४ |
| | (१) नायकलक्षणम्<br>(२) स्वीया<br>(३) धीरोदात्तः<br>(४) अभिसारिका | |
| **प्रश्नः - ४** | **पञ्चप्रश्नाः एकवाक्येन समाधेयाः ।** | ०५ |
| | (१) किं नाम विभावनम् ?<br>(२) नायकस्य के चत्वारः भेदाः ?<br>(३) धीरललितनायकस्य किं लक्षणम् ?<br>(४) पीठमर्दस्योदाहरणं लिखत ।<br>(५) नायकस्य शृङ्गारे के सहायाः ?<br>(६) मुग्धानायिकायाः लक्षणं किम् ?<br>(७) सात्त्विकनायकगुणाः कति ? के च ते ? | |
| | **द्वितीयान्वितिः - २** | |
| **प्रश्नः -५** | **द्वयोः व्याख्या विधेया ।** | ०८ |
| | (१) उद्बुद्धं कारणैः स्वैः स्वैर्बहिर्भावं प्रकाशयन् ।<br>लोके यः कार्यरूपः सोऽनुभावः काव्यनाट्ययोः ॥<br>(२) तत्त्वज्ञानापदीर्ष्यादेर्निर्वेदः स्वावमाननम् ।<br>दैन्यचिन्ताश्रु निःश्वासवैवर्ण्योच्छ्वसितादिकृत् ॥<br>(३) कार्यारम्भेषु सरम्भः स्थेयानुत्साह उच्यते । | |

| | | |
|---|---|---|
| प्रश्नः -६ | स्थायिभावस्य लक्षणं विलिख्य तत्भेदाः ग्रन्थोक्तदिशा सलक्षणं प्रतिपादयत ।<br>अथवा<br>योषिदलङ्काराणां ग्रन्थोक्तदिशा वर्णनं कुरुत । | ०८ |
| प्रश्नः -७ | **एकस्याः टिप्पणीं लिखत ।** | ०२ |
| | (१) व्यभिचारिभावलक्षणम् ।<br>(२) वेपथुः । | |
| प्रश्नः -८ | **द्वौ प्रश्नौ एकवाक्येन समाधेयौ ।** | ०२ |
| | (१) कति संख्याकाः व्यभिचारिणो भवन्ति ?<br>(२) वैवर्ण्यलक्षणं किम् ?<br>(३) अभिसारस्थानानि कति ? | |
| | **तृतीयान्वितिः - ३** | |
| प्रश्नः -९ | **द्वयोः व्याख्या कार्या ।** | ०८ |
| | (१) इष्टानाशादनिष्टाप्तेः करूणाख्यो रसो भवेत् ।<br>धीरैः कपोतवर्णोऽयं कथितो यमदैवतः ॥<br>(२) शृङ्गं हि मन्मथोद्भेदस्तदागमनहेतुकः ।<br>उत्तमप्रकृतिप्रायो रसः शृङ्गार इष्यते ॥<br>(३) भावस्य शान्ताबुद्ये सन्धिमिश्रितयोः क्रमात् ।<br>भावस्य शान्तिरुदयः सन्धिः शबलता मता ॥ | |
| प्रश्नः -१० | | ०८ |
| | शृङ्गाररसः सोदाहरणं ग्रन्थोक्तदिशा सभेदं प्रतिपादनीयः ।<br>अथवा<br>ग्रन्थोक्तदिशा अद्भुतरसः सोदाहरणं विवेचनीयः । | |
| प्रश्नः -११ | **टिप्पणीद्वयं लिखत ।** | ०४ |
| | (१) वीररसः । (२) युद्धवीरः ।<br>(३) हास्यभेदाः । (४) “शून्यं वासगृहम्” – इत्यत्र विभावादयः । | |
| प्रश्नः -१२ | **पञ्चप्रश्नाः एकवाक्येन समाधेयाः ।** | ०५ |
| | (१) रौद्ररसस्य देवता कः ?<br>(२) हास्यरसस्य वर्णः कः ?<br>(३) वीरः कतिविधः ? के च ते ?<br>(४) पूर्वरागस्य त्रयो भेदाः के ?<br>(५) भयानकरसस्य देवता कः ?<br>(६) बीभत्सस्य स्थायिभावः कः ? | |

***